International Journal of Sanskrit Research 2023; 9(6): 212-214

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(6): 212-214
© 2023 IJSR
www.anantaajournal.com
Received: 10-10-2023
Accepted: 09-11-2023

**जुहिना खातुन**
शोधछात्रा विद्यासागर-विश्वविद्यालयस्य, पश्चिम बंगाल, भारत

**Corresponding Author:**
**जुहिना खातुन**
शोधछात्रा विद्यासागर-विश्वविद्यालयस्य, पश्चिम बंगाल, भारत

# वीणावासवदत्तमिति नाटके गर्भाङ्कस्य तात्पर्यम्

**जुहिना खातुन**

**सारांश**

संस्कृतसाहित्ये विरचितेषु नाटकेषु अज्ञातलेखकेन विरचितम् एकं दृश्यकाव्यं वीणावासवदत्तम्। दृश्यकाव्यमिदम् अप्रसिद्धत्वात् परिचितेः अभाववत्त्वात् अपि अन्यतमम्। केषाञ्चित् प्रसिद्धानां संस्कृतनाटकानामिव वीणावासवदत्तनाटकेऽपि मिलनविभेदस्य पुनर्मिलनस्य च दृश्यानि दृश्यन्ते। वीणावासवदत्तमिति नाटकस्य मातृकारूपं त्रिवान्दाम् इति नगरे तालपत्रमध्ये मालयालामिति भाषाक्षरेण उपलब्धम्। माद्राजप्रदेशे औरियेन्टालरिसार्चजार्नाल् इति पत्रिकायां १९२३ ख्रीष्टाब्दे प्रयातः डा. सि कुनहानमहाराजः अस्य नाटकस्य अङ्कचतुष्टयमात्रं प्रकाशितवान्। अस्य नाटकस्य प्रथमे, द्वितीये, तृतीये, चतुर्थे, पञ्चमे च अङ्केमेलनस्य प्रस्तुतिः, षष्ठाङ्के मेलनं, सप्तमाङ्के विच्छेदः, अष्टमाङ्के पुनर्मिलनदृश्यं दर्शितम् अस्ति। नाट्यकारः अष्टमाङ्के पुनर्मिलनाय पूर्ववर्तिषु अङ्केषु अद्भुतविचित्रं नाट्यकौशलं स्वीकृतवान्। अर्थात् षष्ठाङ्कस्य अन्तः पुनः एकस्य अङ्कस्य योजनम् कृतवान्। तत् सप्तमाङ्कपर्यन्तं प्रसरति। यत् नाट्यपरिभाषायां गर्भाङ्कः इति नाम्ना प्रसिद्धः। गर्भाङ्कः स्वल्पभाषया नाटकस्य बीजम् उपस्थापयति, घटनाक्रमेण च मूलनाटकस्य प्रधानोद्देश्येन सह संयुक्तो भूत्वा स फलवान् भवति। गर्भाङ्केन नाट्यकारः तस्य नाटकस्य किञ्चिद् विशेषोद्देश्यं साधयति। गर्भाङ्के प्रस्तावना, सभापूजा च परिलक्ष्येते। अस्मिन् वीणावासवदत्तमितिनाटकेऽपि उदयनवासवदत्तयोः च मेलनं भवति नाटकस्य बीजम्। अत्र इदम् बीजं गर्भाङ्कमाध्यमेन प्रस्फुटितम्। अत्र अर्थोपक्षेपकं नास्ति, स्थापनायाः, मुखसन्धेः च प्रयोगः अस्ति। पञ्चपात्रैः गर्भाङ्कः प्रदर्शितो भवति। यथा – उदयनः, वासवदत्ता, साङ्कृत्यायनी, विदूषकः, भरतरोहकः च। अस्य नाटकस्य स्वयं नायकः उदयनः "वासवदत्ताधिकारम्" इति नाम्ना गर्भाङ्कस्य नामकरणं कृतवान्। नाटकस्य अन्ते परिणयः न दर्शितः किन्तु तौ स्वप्रणयविषये ज्ञातवन्तौ। परन्तु गर्भाङ्के नायकः उदयनः वासवदत्तामेव नायिकारूपेण सहृदयपाठकानां निकटे परिचाययति स्म। अर्थात् गर्भनाटकस्य विषयवस्तुना सह मूलनाटकस्य विषयवस्तु केन प्रकारेण मिश्रितं भवति तस्य एकविधम् अद्भूतं नाट्यकौशलं नाट्यकारः अस्मिन् नाटके प्रदर्शितवान्।

**कूटशब्दः** गर्भाङ्कः, दृश्यकाव्यम् ,स्थापना ,मुखसन्धिः ,प्रतिमुखसन्धिः, वासवदत्ताधिकारम्।

## प्रस्तावना

केषुचित् प्रसिद्धेषु संस्कृतनाटकेषु मिलनविभेदस्य पुनर्मिलनस्य च दृश्यानि दृश्यन्ते। यथा- स्वप्नवासवदत्तम्, विक्रमोर्वशीयम्, अभिज्ञान-शकुन्तलम्, मृच्छकटिकम् इत्यादिनी। वीणावासवदत्तनाटकेऽपि अस्य नियमस्य व्यतिक्रमः न दृश्यते। वीणावासवदत्तमिति नाटकस्य मातृकारूपं त्रिवान्दाम् इति नगरे तालपत्रमध्ये मालयालामिति भाषाक्षरेण उपलब्धम्। माद्राजप्रदेशे औरियेन्टालरिसार्चजार्नाल् इति पत्रिकायां १९२३ ख्रीष्टाब्दे प्रयातः डा. सि कुनहानमहाराजः अस्य नाटकस्य अङ्कचतुष्टयमात्रं प्रकाशितवान्। परवर्तिनामङ्कानाम् कियदंशोऽपि तेन प्रकाशितः। अस्य नाटकस्य तथ्यं प्रति विद्वद्दृष्टिसमाकर्षणाय सम्पादकः के.भि.शर्मा इमानि भासवैशिष्ट्यानि निरीक्ष नाटकमिदं भाससमस्यां पुनर्विवेचनाय कार्यकरमिति मत्वा तेन प्रकाशितम्। भाससमस्यायाः समाधाने विवेचनायोग्यत्वाद् इदं नाटकं विशेषतः पण्डितानां दृष्टिमाकर्षति। एतदर्थम् अध्यापकः कुप्पुस्वामीशास्त्रीमहोदयेन परवर्तिकाले नाटकमिदं पुस्तकस्य आकारेन प्रकाशितम् (Madras Oriental Series1932 as No.2)।

अस्य नाटकस्य प्रथमे, द्वितीये, तृतीये, चतुर्थे, पञ्चमे च अङ्केमेलनस्य प्रस्तुतिः, षष्ठाङ्के मेलनं, सप्तमाङ्के विच्छेदः, अष्टमाङ्के पुनर्मिलनदृश्यं दर्शितम् अस्ति। अष्टमाङ्के पुनर्मेलनाय पूर्ववर्तिषु अङ्केषु नाट्यकारस्य अभिनवप्रयासः परिलक्ष्यते। नाटकस्य प्रथमाङ्के उज्जयिन्याः राजा महासेनः प्रद्योतः तस्य कन्यायाः वासवदत्तायाः परिणयाय अचिन्तयत्। स वासवदत्तां कृते उपयुक्तपात्रस्य अन्वेषणार्थं महादेवस्य समीपे प्रार्थयति। महादेवः स्वप्ने गुणरत्नरूपपुष्पेण मालया एकं श्लोकं ग्रथित्वा माम् निदर्शति। यदि एवम्गुणयुक्तपात्रस्य हस्ते वासवदत्तां यच्छति तर्हि वासवदत्ता सुखयशोभोगिनी भविष्यति। इदं श्रुत्वा वसुवर्मा वदति महादेवः एकमात्रवत्सराजं मत्वा एवम्गुणान् अवदत्। प्रद्योतः तु अतीव दाम्भिकः राजा। ततः स उदयनं परित्यज्य उक्तवान् - *न गणयति नरेश्वरान् क्षितौ मृगपतिपोत इव द्विपेश्वरान्।*[1] स वदति उदयनः

यद्यपि सर्वगुणसम्पन्नोराजा तथापि अहं तुभ्यं कन्यासम्प्रदानं न करिष्यामि । परन्तु उदयनः स्वयं यदि तस्य कन्यया सह परिणयं करोति तदा स आनन्दितो भविष्यति । अतःपरं प्रद्योतस्य मन्त्रिणः उदयनस्य वन्धनं कर्तुं परिकल्पयन्ति । तदा भरतरोहकः आह उदयनस्य एकः अभिशापः अस्ति यत् स गजेन क्षतिग्रस्तो भविष्यति । द्वितीयाङ्के शालङकायनः सैनिकैः सह उदयनं ध्नाति । तृतीयाङ्के यौगन्धरायणः उदयनस्य रक्षार्थम् एकांकल्पनां करोति । स उन्मत्तवेषेण उज्जयिनीं प्रविशति । चतुर्थाङ्के यौगन्धरायणः परेद्यु एकं नलागिरिनामकं मत्तगजं प्रद्योतस्य राजधान्यां प्रेषयितुमिच्छति । तेन प्रजाः उद्विग्नाः भविष्यन्ति । अहं हि च जानामि उदयनः इमं मत्तगजं स्ववशीभूतं करिष्यति तदा उदयनः वन्धनात् मुक्तः भविष्यति । अतः हंसकः यौगन्धरायणश्च परिकल्पितवृत्तान्तस्य समापनाय मन्दिरं निकषा अपेक्षेते । पूर्वकल्पनानुसारम् उदयनः गीतेन मत्तगजं वशीभूतं करोति । अतःपरं वत्सराजः भरतरोहकस्य हस्ते वीणां ददाति ।वीणागीतं श्रुत्वा वासवदत्ता चिन्तयति यत् - *अस्यैवैषानुरुपा वीणा ।*[२] सपरिवारो राजा वातायनस्य समीपे तिष्ठति । काञ्चुकीयः भरतरोहकात् वीणां प्राप्तुं प्रासादं प्रविशति ।ततः काञ्चुकीयात् वासवदत्ता वीणां गृह्णाति । वारणाधिरुढोवत्सराजः वातायनस्य समीपे विशति । तं दृष्ट्वा प्रद्योतः विनयं प्रदर्शयति ।*महान् खलु ममोपकारः कृतः । अतीव तव परिश्रमः भवति अतः अद्य तावत् त्वं विश्रामं लभस्व ।*[३] एवं संलापे क्रियमाणे एकः अपरं पश्यति । प्रथमदर्शने एव उदयनः वासवदत्ता च एकः अपरं प्रति आकृष्टहृदयौ अभवताम् । पञ्चमाङ्के वासवदत्ता उदयनाय उत्कण्ठिता दुःखिता च अभवत् । काञ्चनमाला, चेटी, वासवदत्ताश्च उदयनसम्वन्धे उद्याने संलापं कुर्वतः । चेटी वदति एका सन्न्यासीनि तया परिचिता । तस्याः नाम साङ्कृत्यायनी । सा नैपथ्यात् ईश्वरप्रभावेन सर्व्वं वृत्तान्तं ज्ञात्वा वदितुं शक्नोति । साङ्कृत्यायनी नैपथ्यात् चेट्याः काञ्चनमालायाश्च सर्व्वं वृत्तान्तं शृणोति । साङ्कृत्यायनी उदयनस्य वासवदत्तायाश्च प्रणयस्य कथां चिन्तयित्वा प्रविशति । सा जानाति - उदयनः पूर्वं वासवदत्तां यमुनायाः जलात् अरक्षत् । किन्तु इदानीं परस्परं न अवगच्छतः । अन्यच्च वासवदत्तायाः पितरौ तां दृष्ट्वा चिन्ताग्रस्तौ, यत् तयोः कन्यायाः हृदः विकारः सञ्जातः । तौ स्वकन्यायाः इमाम् अवस्थां पारिव्राजिकासाङ्कृत्यायनै अवदताम् । यतः साङ्कृत्यायनी ईश्वरस्य ध्याने अमज्जत्। सा ईश्वरस्य सहायेन सर्व्वं ज्ञातुमर्हति । तौ साङ्कृत्यायनीं निकषा प्रासादं प्रविश्य तया सह सर्व्वं वृत्तान्तं परामृशतः । साङ्कृत्यायनी आह वासवदत्ता गन्धर्वग्रस्ता प्रतिभातीति । अपरपक्षे उदयनः वासवदत्तया विना विक्लवो दृष्टः मनःसन्तापात् । उदयनस्य अस्य मनःसन्तापस्य कारणं भवति वासवदत्ता । साङ्कृत्यायनी वदति यत् अहं शृणोमि *स खलु चित्ररथो नाम गन्धर्वराजो भगवता तुम्बुरुणा शाप्तो मनुष्येषूत्पन्नो भव इति ।*[४] इमां वार्तां श्रुत्वा राजा आत्मगतं संकल्पं करोति उदयनं निकषा वासवदत्तां प्रेषयितुम् । वासवदत्ता मदनसन्तापात् उदयनं त्रातुं शक्नोति । परन्तु राजा प्रद्योतः अपवादात् वासवदत्तां त्रातुम् उदयनं निकषा वीणाशिक्षालाभव्यजेन प्रेषितवान् । इदानीम् उदयनः वासवदत्ता च परस्परं प्रति प्रणयासक्तौ भवतः, परन्तु द्वौ न परस्परं वदतः । तदा नाट्यकारः अष्टमाङ्के पुनर्मिलनाय अद्भुतविचित्रं नाट्यकौशलं स्वीकृतवान् । अर्थात् षष्ठाङ्कस्य अन्तः पुनः एकस्य अङ्कस्य योजनम् कृतवान् । तत् सप्तमाङ्कपर्यन्तं प्रसरति । यत् नाट्यपरिभाषायां गर्भाङ्कः इति नाम्ना प्रसिद्धः । साहित्यदर्पणग्रन्थस्य षष्ठाध्याये आचार्यविश्वनाथः गर्भाङ्कस्य लक्षणविषये उक्तवान् -

अङ्कोदरप्रविष्टो यो रङ्गद्वारामुखादिमान् ।
अङ्कोऽपरः स गर्भाङ्कः सवीजः फलवानपि ॥[५]

अर्थात् अङ्कस्य मध्ये सन्निविष्टं यत् नाटकम् तत् गर्भाङ्कः इत्युच्यते । गर्भाङ्कः स्वल्पभाषया नाटकस्य बीजम् उपस्थापयति, घटनाक्रमेण च मूलनाटकस्य प्रधानोद्देश्येन सह संयुक्तो भूत्वा स फलवान् भवति । गर्भाङ्केन नाट्यकारः तस्य नाटकस्य किञ्चिद् विशेषोद्देश्यं साधयति । गर्भाङ्के प्रस्तावना, सभापूजा च परिलक्ष्येते ।

वीणावासवदत्तमिति नाटके गर्भाङ्के परिलक्ष्यते यत् वत्सराजउदयनः अधुना कामतापे सन्तप्तः । यदा उदयनः विषण्णमनसा वासवत्तायाः कथां चिन्तयति तदा विदूषकः उदयनम् अन्वेषिष्यति । ततः सः पश्यति यत् उदयनः ज्वालागृहे चिन्तानिश्चलनयन उपविष्टः । विदूषकः उदयनं पृच्छति किं महाकाव्यं चिन्त्यते अथवा नाटकम् ? उदयनः आह मया नाटकं चिन्त्यते । अस्य नाटकस्य नाम 'वासवदत्ताधिकारम्' । विदूषकेन उक्तं अस्मिन् नाटके कस्यां भूमिकायां कः सम्मतः ? उदयनः वक्ति यत् अस्मिन् नाटके अहं स्वयं नायकः भविष्यामि वासवदत्ता नायिका च । यौगन्धरायणः अस्य नाटकस्य सूत्रधारः,साङ्कृत्यायनी नटी, वसन्तकः विदूषकः च मम वयस्यः, गायकः, वादकश्च । वसन्तकः नाटकं प्रशंसति । विदूषकः वदति सूत्रधारो नटी च खलु प्रथमं स्थापनां करिष्यत । अहं तु नायिकावासवदत्तया सह नर्तिष्यामीति तर्कयामि । पुनश्च आह यदि यौगन्धरायणः विद्यते तदा न केवलम् इदं नाटकम् अपि तु ईदृशं शतनाटकमपि पुनर्नर्तिष्यामीति तर्कयामि । उदयनः विदूषकं पृच्छति इदानीं राजकुलस्य वार्ता का ? प्रत्युत्तरे विदूषकः व्रवीति पाञ्चालदूतेन नागदत्तेन वहुकैरुपायनैः प्रद्योतः परितोषितः । प्रद्योतेन दूतं प्रति उक्तम्- *शूरो विक्रान्त सर्वविद्याकुशलो अनुरक्तमित्रजनपदः उदयनः । ततस्तस्य रक्षा न प्रमादेन कर्तव्या । स्वामिनः तत्रैव प्रत्याघातो मा भूत इति कौशाम्वी मयाक्रान्ता । विज्ञापयास्मान् । कर्तव्यं प्रति स्वामिपाद एव प्रमाणम्*[६]इति । किञ्च विदूषकः वदति प्रद्योतः तव (उदयनस्य) गुणाय प्रीणाति । अतःपरं दौवारिकः भरतरोहकश्च प्रविशतः । भरतरोहकेन उदयनः जानीते यत् वासवदत्ता खलु इदानीं गान्धर्वे सञ्जाताभिलाषा संवृत्ता । प्रद्योतोऽपि च आह उदयनः किम् उपकारस्य अनुग्रहं करिष्यति ? उदयनः हृदयात् सम्मतिं ददाति । अतःपरं भरतरोहकः महासेनस्य निर्देशे उदयनं विदूषकं च नीत्वा रथम् आरुह्य प्रद्योतस्य राजप्रासादान्तःपुरम् आगच्छति । वत्यराजःउदयनः प्रासादं प्रविशति । षष्ठाङ्कः समाप्तः । सप्तमाङ्के वासवदत्ता काञ्चनमालया सह वीणाशिक्षायाः विषये आभाषणम् अकरोत् । साङ्कृत्यायन्या मुह्यते यत् तस्याः अभिलाषः कार्यकरो भवति । साङ्कृत्यायनी अवदत् उदयनः वासवदत्तायै वीणाशिक्षां दातुं शक्नोति । सा तयोः भरतकमण्डपप्रासादे गन्तुं वदति यत्र उदयनः प्रद्योतस्य मन्त्री भरतरोहकः, विदूषकः, काञ्चुकीयश्च सन्ति । भरतरोहकः शिक्षकस्य शिष्यस्य च परिचयं कृत्वा प्रस्थानं करोति, परन्तु साङ्कृत्यायनी तिरोभूता अभवत् ।

अतःपरं विदूषकः अवदत् - *भोः समाप्ता स्थापना ।*[७]

उदयनः विदूषकं अवदत् ततः वयं मञ्चं प्रविष्टवन्तः । विदूषकः उदयनं पृष्टवान् यत् ततः नटी स्थापनामाध्यमेन मञ्चे पात्रं प्रविष्टवती ?प्रत्युत्तरे उदयनः अवदत् क्वापि समस्या नास्ति, सूत्रधारस्य स्थानेनेपथ्ये नटी स्थापनां कृतवती ।अतःपरं साङ्कृत्यायन्या उत्साहे उदयनः वीणाशिक्षाम् आरभते । काञ्चुकीयः उदयनस्य वीणां नीत्वा आगच्छति । वासवदत्तां दृष्ट्वा सः अतीव मुह्यति । अतःपरम् एकेन गीतेन तस्य प्रणयस्य कथां वासवदत्तयै अज्ञापयत् । वासवदत्ता प्रथमपाठं यथायथं गृह्णाति । उदयनः पुनः एकं गीतं गायति । विदूषकः एकं नृत्यानुष्ठानम् आयोजनम् अकरोत् । अस्मिन् नृत्यानुष्ठाने साङ्कृत्यायनी उदयनं वासवदत्तां च गन्तुम् अवदत् । इदम् अनुष्ठानम् एकम् अवसरस्वरूपम् यत्र प्रेमिकप्रेमिकानां परस्परदर्शनं सम्भवति । अतःपरं विदूषकेन उक्तं प्रथमाङ्कः समाप्तः । अथः उदयनः अवदत् - मुखसन्धिः समाप्तः । अस्य मुखसन्धिविषये विश्वनाथः उक्तवान् -

यत्र बीजसमुत्पत्तिर्नानार्थरससम्भवा ।
प्रारम्भेण समायुक्ता तन्मुखं परिकीर्त्तितम् ॥[८]

यस्मिन् सन्धौ बहुवृत्तान्तेन रसयुक्तभावेन च आरम्भनामावस्थया सह च संयुक्ता भूत्वा बीजस्य समुत्पत्तिर्जायते सा मुखसन्धिरिति कथ्यते ।

अर्थात् अस्मिन् वीणावासवदत्तमितिनाटकेऽपि उदयनवासवदत्तायोः च मेलनं भवति नाटकस्य बीजम् । अत्र इदम् बीजं सङ्गीतमाध्यमेन प्रस्फुटितम् । अतः एतद् मुखसन्धिः । ततः उदयनः एतदपि सूचितवान् यत् परदिनाङ्के प्रतिमुखसन्धिना सह द्वितीयाङ्कः आरभ्यते । परन्तु उदयनः दुःखितः अभवत् यत् उदयनः वासवदत्तां प्रति आसक्तो भवति परन्तु सः न जानाति वासवदत्ता किं तं प्रति अनुरक्ता भवति न वा इति ? स एवं वसन्तकेन सह आलापम् अकरोत् । वसन्तकः एकां किंवदन्तीम् अकरोत् यत् उदयनः नगर्य्यां नर्मदानाम्नीं एकां स्वैरिणीं प्रति आसक्तो अभवत् ।अधिकन्तु निर्वहणसन्धौ विदूषकस्य *अस्तिमूल्यापणिकसक्ता नर्मदा पाठकानां च नाम वन्धकी*[९]- इति वचनेन सर्वेषां सहृदयानां दर्शकानां च हृदि विस्मयेन सञ्चरति अद्भूतरसः । अतःपरम उदयनः अचिन्तयत् इमां वार्तां श्रुत्वा वासवदत्तायाः हृदयस्य किञ्चित्

परिवर्तनं भविष्यति यदि सा मां प्रीणाति । अत्र नर्मदावृत्तान्तमाध्यमेन प्रतिमुखसन्धेः लक्षणं प्रदर्शिता भवति । यत् वयम् अष्टमाङ्के अर्थात् मूलनाटकस्य घटनास्रोते द्रष्टुम् आप्स्यामः ।

अष्टमाङ्के वासवदत्ता काञ्चनमालां ज्ञापयति यत् सः उदयनाय उद्विग्ना भवति । वासवदत्ता स्वप्ने उदयनः पश्यति किन्तु वस्तुतः तस्मात् दूरं तिष्ठति । अस्मिन् समये चेटी प्रविशति । चेटी वासवदत्ताम् आह वत्सराजेन किल नर्मदा काम्यते । सा इमं सन्देशं पद्मावतीं निकषा ज्ञातुं शक्नोति । वासवदत्ता अतीव कष्टम् आप्नोति । काञ्चनमाला वदति – *किं राजहंसः काकीं कामयते ?*[१०] इदं श्रुत्वा वासवदत्ता वक्ति – *असाधारणं पतिं कामय इति मया ज्ञातम् । सर्वसाधारणः कामय ।*[११] काञ्चनमाला वासवदत्तां वदति मा अकारणे त्वं सन्तप । यदि अयं वृत्तान्तः सत्यं भवेत् तदा अवश्यमेव भर्तुर्विकारान्तरेण कृतमिति । ते सत्यस्य उद्घाटनं करिष्यन्ति । अस्मिन् विषये आवाम् साङ्कृत्यायनीं पृच्छावः । ते साङ्कृत्यायनीं सर्वं वदतः । साङ्कृत्यायनी वासवदत्ताम् आह - उदयनः यदि इदं जनश्रुतिं न उक्तवान् तदा त्वम् उदयनं प्रति अनुरक्ता इति अस्माभिः न अवगत स्यात् । साङ्कृत्यायनी उदयनस्य सर्वं वृत्तान्तं वासवदत्तां ज्ञापयति । वासवदत्ता सर्वं श्रुत्वा अचैतन्या जाता । सा वासवदत्तायाः आनने आपः सिञ्चति । इदानीं वासवदत्तायाः हृदयं निर्वृत्तम् । तदानीं नाडामूला उदयनात् वीणां आनीय तत्र प्रविशति । उदयनम् अवदत् यत् अस्य पत्रस्य यथायोग्यं सम्मानं प्रदेयम् । साङ्कृत्यायनी एकं गीतं कर्तुं वासवदत्ताम् आदेशयति । काञ्चनमाला वासवदत्तां व्रवीति उदयनाय नवप्रणयस्य वार्ताप्रदाने इदानीं यथायथसमयोऽयम् । इदं श्रुत्वा वासवदत्ता वीणायाः सङ्गीतेन उदयनं प्रति प्रेमनिवेदनम् अकरोत् । सर्व्वे निष्क्रान्ता । साङ्कृत्यायनी धिनोति यत् इदं नाटकं सुष्ठुरूपेण अतिशयरूपेण च समाप्तो भवति ।

पूर्वे गर्भाङ्के उदयनः अवदत् यत् प्रतिमुखसन्धिना सह द्वितीयाङ्कः आरम्भो भविष्यति । यत् उचितम् यथायथम् वा आसीत् । नर्मदावृत्तान्तेन नायकस्य नायिकायाः च मध्ये प्रतिकुलअवस्थाः जनयते चेत् अनन्तरम् अनुकुलवृत्तान्तः प्रवहति । गर्भाङ्के वर्णितम्अनेन नर्मदावृत्तान्तमाध्यमेन उदयनः वासवदत्ता च परस्परयोः हृदययोः वार्ताम् अजानीताम् । अस्य प्रतिमुखसन्धिविषये विश्वनाथेन उक्तं –

फलप्रधानोपायस्य मुखसन्धिनिवेशिनः ।
लक्ष्यालक्ष्य इवोद्भेदो यत्र प्रतिमुखञ्च तत् ॥[१२]

नाटकस्य यस्मिन् अंशे मुखसन्धौ उप्तवीजं कदापि लक्षितभावेन पुनः कदापि अलक्षितभावेन सकृत् अनुकूलावस्थायाः पुनश्च प्रतिकूलावस्थायाः सम्मुखीनं भवति सा प्रतिमुखसन्धिरिति वर्त्तते ।

गर्भाङ्कस्य लक्षणनिर्णयप्रसङ्गे रुपगोस्वामी नाटकचन्द्रिकायाम् उक्तवान् –

अङ्कप्रसङ्गाद्गर्भाङ्कलक्षणं वक्ष्यते मया ॥[१३]
अङ्कस्य मध्ये योऽङ्कःस्यादसौ गर्भाङ्क ईरितः ।
वस्तुसूचकनान्दीको दिङ्मात्रमुखसङ्गतः ॥[१४]
अर्थोपक्षेपकैर्हीनोयुतः पात्रैस्तु पञ्चषैः ।
अन्वेष्यवस्तुविषयः स्वाधाराङ्कान्तशोभितः ॥[१५]
नातिप्रपञ्चेतिवृत्तःप्रस्तुतार्थानुबन्धकः ।
प्रथमाङ्के न कर्तव्यः सोऽयं काव्यविशारदैः ।
चतुर्थाऽङ्के तु गर्भाङ्को यथा ललितमाधवे ॥[१६]

अर्थात् अङ्कस्य मध्ये योऽङ्कः स गर्भाङ्कः इत्युच्यते । अत्र नान्दीविषयः,मुखसन्धिः च परिलक्ष्येते । अर्थोपक्षेपकहीनः पञ्चपात्रैः प्रयोजितो भवति । गर्भाङ्कः प्रथमाङ्के न प्रयुज्यते ।

वीणावासवदत्तनाटकेऽपि गर्भाङ्कः षष्ठाङ्कस्य मध्ये प्रयुक्तो भवति, प्रथमाङ्के न परिलक्ष्यते । अत्र अर्थोपक्षेपकं नास्ति, स्थापनायाः, मुखसन्धेः च प्रयोगः अस्ति । पञ्चपात्रैः गर्भाङ्कः प्रदर्शितो भवति । यथा – उदयनः, वासवदत्ता, साङ्कृत्यायनी, विदूषकः, भरतरोहकः च ।

अस्य वीणावासवदत्तमिति नाटकस्य षष्ठाङ्के यः गर्भाङ्कः अस्ति, तस्मिन् गर्भाङ्के शृङ्गाराद्भुतरसाश्रितस्य निबन्धस्य उल्लेखो अस्ति । सूत्रधारस्य वाचिकाङ्गिकाभिनयमाध्यमेन रङ्गद्वार- नामकः अङ्गः प्रस्तावना च दृश्यते । अत्र नान्दी इति शब्दस्य उल्लेखो नास्ति । अस्य नाटकस्य स्वयं नायकः उदयनः "वासवदत्ताधिकारम्" इति नाम्ना गर्भाङ्कस्य नामकरणं कृतवान् । नाटकस्य अन्ते परिणयः न दर्शितः किन्तु तौस्वप्रणयविषये ज्ञातवन्तौ । परन्तु गर्भाङ्के नायकः उदयनः वासवदत्तामेव नायिकारूपेण सहृदयपाठकानां निकटे परिचाययति स्म । अर्थात् गर्भनाटकस्य विषयवस्तुना सह मूलनाटकस्य विषयवस्तु केन प्रकारेण मिश्रितं भवति तस्य एकविधम् अद्भूतं नाट्यकौशलं नाट्यकारः अस्मिन् नाटके प्रदर्शितवान् ।

### उल्लेखपञ्जि

1. वीणावासवदत्तम् , प्रथमोऽङ्कः, Sri K.V.Sarma, (सम्पादकः), पृष्ठाङ्कः – ८
2. तदेव, चतुर्थोऽङ्कः,पृष्ठाङ्कः-७२
3. तदेव, पृष्ठाङ्कः-७७
4. तदेव, पञ्चमोऽङ्कः, पृष्ठाङ्कः-९२
5. साहित्यदर्पणः, षष्ठपरिच्छेदः, आचार्य लोकमणिदाहालः डा. त्रिलोकीनाथद्विवेदी च (सम्पादकः), पृष्ठाङ्कः -४७६
6. वीणावासवदत्तम् , षष्ठोऽङ्कः, Sri K.V.Sarma, (सम्पादकः), पृष्ठाङ्कः – १००
7. तदेव, पृष्ठाङ्कः–११०
8. साहित्यदर्पणः, षष्ठपरिच्छेदः, उदयवन्द्योपाध्यायः, (सम्पादकः), पृष्ठाङ्कः – ४२
9. वीणावासवदत्तम् , सप्तमोऽङ्कः, Sri K.V.Sarma, (सम्पादकः), पृष्ठाङ्कः-१२१
10. तदेव, अष्टमोऽङ्कःपृष्ठाङ्कः-१२७
11. तदेव, पृष्ठाङ्कः- १२७
12. साहित्यदर्पणः, षष्ठपरिच्छेदः, उदयवन्द्योपाध्यायः, (सम्पादकः), पृष्ठाङ्कः-४२
13. नाटकचन्द्रिका, प्रकाश, बाबुलाल शुक्ल, (सम्पादकः), पृष्ठाङ्कः –१४५
14. तत्रैव
15. तत्रैव
16. तत्रैव

### परिशीलितग्रन्थपञ्जि


1. धनञ्जयः। *दशरूपकम्* । सम्पा. - अनिलचन्द्रवसुः। कोलकाता, संस्कृत वुक डिपो , २०१८(पुनर्मुद्रणम्) ।
2. विश्वनाथकविराजः। *साहित्यदर्पणः* । सम्पादकौ - आचार्य लोकमणिदाहालः डा. त्रिलोकीनाथद्विवेदी । वाराणसी, चौखम्बा सुरभारती प्रकाशन,
3. २०१७ ।
4. ------------|----------| सम्पादकः - उदयचन्द्रवन्द्योपाध्यायः। कोलकाता, संस्कृत वुक डिपो, २०१३(पुनर्मुद्रणम्) ।
5. -----------|----------| सम्पादकः - विमलाकान्तमुखोपाध्यायः । कोलकाता, संस्कृत पुस्तक भाण्डार, २०१३(द्वितीयसंस्करणम्) ।
6. श्रीरूपगोस्वामिप्रभुपादः। *नाटकचन्द्रिका* । सम्पादकः - बाबुलाल शुक्ल । वाराणसी, चौखम्बा संस्कृत सीरीज अफिस,१९६४ (प्रथमसंस्करणम्) ।
7. वन्द्योपाध्याय, धीरेन्द्रनाथ। *संस्कृत साहित्येर इतिहास ।* कलकाता: पश्चिमवङ्ग राज्यपुस्तक पर्षद, २०१२(पञ्चममुद्रणम्) ।
8. हाजरा , नीरदवरण। *संस्कृत साहित्येर इतिहास ।* कलकाता: पाण्डुलिपि, २००९(प्रथमसंस्करणम्) ।
9. *vīṇāvāsavadattam,* ed.C.Kunhan Raja, Madras,Madras Oriental Series No.2, 1927 (Revised Edition).
10. --------------------, ed. K.V. Sarma, Madras, Kuppuswami Shastri Research Institute, 1962 (Revised Edition).